# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय २३

स तु जित्वा दशग्रीवो यमं त्रिदशपुङ्गवम् ।
रावणस्तु जयश्लाघी स्वसहायान्ददर्श ह ॥१॥

जयेन वर्धयित्वा च मारीचप्रमुखास्ततः ।
पुष्पकं भेजिरे सर्वे सान्त्विता रवणेन ह ॥२॥

ततो रसातलं हृष्टः प्रविष्टः पयसो निधिम् ।
दैत्योरग गणाध्युष्टं वरुणेन सुरक्षितम् ॥३॥

स तु भोगवतीं गत्वा पुरीं वासुकिपालिताम् ।
स्थाप्य नागान्वशे कृत्वा ययौ मणिमतीं पुरीम् ॥४॥

निवातकवचास्तत्र दैत्या लब्धवरा वसन् ।
राक्षसस्तान्समासाद्य युद्धेन समुपाह्वयत् ॥५॥

ते तु सर्वे सुविक्रान्ता दैतेया बलशालिनः ।
नानाप्रहरणास्तत्र प्रयुद्धा युद्धदुर्मदाः ॥६॥

तेषां तु युध्यमानानां साग्रः संवत्सरो गतः ।
न चान्यतरयोस्तत्र विजयो वा क्षयोऽपि वा ॥७॥

ततः पितामहस्तत्र त्रैलोक्यगतिरव्ययः ।
आजगाम द्रुतं देवो विमानवरमास्थितः ॥८॥

निवातकवचानां तु निवार्य रणकर्म तत् ।
वृद्धः पितामहो वाक्यमुवाच विदितार्थवत् ॥९॥

न ह्ययं रावणो युद्धे शक्यो जेतुं सुरासुरैः ।
न भवन्तः क्षयं नेतुं शक्याः सेन्द्रैः सुरासुरैः ॥१०॥

राक्षसस्य सखित्वं वै भवद्भिः सह रोचते ।
अविभक्ता हि सर्वार्थाः सुहृदां नात्र संशयः ॥११॥

ततोऽग्निसाक्षिकं सख्यं कृतवांस्तत्र रावणः ।
निवातकवचैः सार्धं प्रीतिमानभवत्तदा ॥१२॥

अर्चितस्तैर्यथान्यायं संवत्सरसुखोषितः ।
स्वपुरान्निर्विशेषं च पूजां प्राप्तो दशाननः ॥१३॥

स तूपधार्य मायानां शतमेकोनमात्मवान् ।
सलिलेन्द्रपुरान्वेषी स बभ्राम रसातलम् ॥१४॥

ततोऽश्मनगरं नाम कालकेयाभिरक्षितम् ।
तं विजित्य मुहूर्तेन जघ्ने दैत्यांश्चतुःशतम् ॥१५॥

ततः पाण्डुरमेघाभं कैलासमिव संस्थितम् ।
वरुणस्यालयं दिव्यमपश्यद्राक्षसाधिपः ॥१६॥

क्षरन्तीं च पयो नित्यं सुरभिं गामवस्थिताम् ।
यस्याः पयोविनिष्यन्दात्क्षीरोदो नाम सागरः ॥१७॥

यस्माच्चन्द्रः प्रभवति शीतरश्मिः प्रजाहितः ।
यं समासाद्य जीवन्ति फेनपाः परमर्षयः ।
अमृतं यत्र चोत्पन्नं सुरा चापि सुराशिनाम् ॥१८॥

यां ब्रुवन्ति नरा लोके सुरभिं नाम नामतः ।
प्रदक्षिणं तु तां कृत्वा रावणः परमाद्भुताम् ।
प्रविवेश महाघोरं गुप्तं बहुविधैर्बलैः ॥१९॥

ततो धाराशताकीर्णं शारदाभ्रनिभं तदा ।
नित्यप्रहृष्टं ददृशे वरुणस्य गृहोत्तमम् ॥२०॥

ततो हत्वा बलाध्यक्षान्समरे तैश्च ताडितः ।
अब्रवीत्क्व गतो यो वो राजा शीघ्रं निवेद्यताम् ॥२१॥

युद्धार्थी रावणः प्राप्तस्तस्य युद्धं प्रदीयताम् ।
वद वा न भयं तेऽस्ति निर्जितोऽस्मीति साञ्जलिः ॥२२॥

एतस्मिन्नन्तरे क्रुद्धा वरुणस्य महात्मनः ।
पुत्राः पौत्राश्च निष्क्रामन्गौश्च पुष्कर एव च ॥२३॥

ते तु वीर्यगुणोपेता बलैः परिवृताः स्वकैः ।
युक्त्वा रथान्कामगमानुद्यद्भास्करवर्चसः ॥२४॥

ततो युद्धं समभवद्दारुणं लोमहर्षणम् ।

सलिलेन्द्रस्य पुत्राणां रावणस्य च रक्षसः ॥ २५ ॥

अमात्यैस्तु महावीर्यैर्दशग्रीवस्य रक्षसः ।
वारुणं तद्बलं कृत्स्नं क्षणेन विनिपातितम् ॥ २६ ॥

समीक्ष्य स्वबलं सङ्ख्ये वरुणस्या सुतास्तदा ।
अर्दिताः शरजालेन निवृत्ता रणकर्मणः ॥ २७ ॥

महीतलगतास्ते तु रावणं दृश्य पुष्पके ।
आकाशमाशु विविशुः स्यन्दनैः शीघ्रगामिभिः ॥ २८ ॥

महदासीत्ततस्तेषां तुल्यं स्थानमवाप्य तत् ।
आकाशयुद्धं तुमुलं देवदानवयोरिव ॥ २९ ॥

ततस्ते रावणं युधे शरैः पावकसंनिभैः ।
विमुखीकृत्य संहृष्टा विनेदुर्विविधान्नवान् ॥ ३० ॥

ततो महोदरः क्रुद्धो राजानं दृश्य धर्षितम् ।
त्यक्त्वा मृत्युभयं वीरो युद्धकाङ्क्षी व्यलोकयत् ॥ ३१ ॥

तेन तेषां हया ये च कामगाः पवनोपमाः ।
महोदरेण गदया हतास्ते प्रययुः क्षितिम् ॥ ३२ ॥

तेषां वरुणसूनूनां हत्वा योधान्हयांश्च तान् ।
मुमोचाशु महानादं विरथान्प्रेक्ष्य तान्स्थितान् ॥ ३३ ॥

ते तु तेषां रथाः साश्वाः सह सारथिभिर्वरैः ।
महोदरेण निहताः पतिताः पृथिवीतले ॥ ३४ ॥

ते तु त्यक्त्वा रथान्पुत्रा वरुणस्य महात्मनः ।
आकाशे विष्ठिताः शूराः स्वप्रभावान्न विव्यथुः ॥ ३५ ॥

धनूंषि कृत्वा सज्यानि विनिर्भिद्य महोदरम् ।
रावणं समरे क्रुद्धाः सहिताः समभिद्रवन् ॥ ३६ ॥

ततः क्रुद्धो दशग्रीवः कालाग्निरिव विष्ठितः ।
शरवर्षं महावेगं तेषां मर्मस्वपातयत् ॥ ३७ ॥

मुसलानि विचित्राणि ततो भल्लशतानि च ।
पट्टसांश्चैव शक्तीश्च शतघ्नीस्तोमरांस्तथा ।
पातयामास दुर्धर्षस्तेषामुपरि विष्ठितः ॥ ३८ ॥

अथ विद्धास्तु ते वीरा विनिष्पेतुः पदातयः ॥ ३९ ॥

ततो रक्षो महानादं मुक्त्वा हन्ति स्म वारुणान् ।
नानाप्रहरणैर्घोरैर्धारापातैरिवाम्बुदः ॥ ४० ॥

ततस्ते विमुखाः सर्वे पतिता धरणीतले ।
रणात्स्वपुरुषैः शीघ्रं गृहाण्येव प्रवेशिताः ॥ ४१ ॥

तानब्रवीत्ततो रक्षो वरुणाय निवेद्यताम् ।
रावणं चाब्रवीन्मन्त्री प्रभासो नाम वारुणः ॥ ४२ ॥

गतः खलु महातेजा ब्रह्मलोकं जलेश्वरः ।
गान्धर्वं वरुणः श्रोतुं यं त्वमाह्वयसे युधि ॥ ४३ ॥

तत्किं तव वृथा वीर परिश्राम्य गते नृपे ।
ये तु संनिहिता वीराः कुमारास्ते पराजिताः ॥ ४४ ॥

राक्षसेन्द्रस्तु तच्छ्रुत्वा नाम विश्राव्य चात्मनः ।
हर्षान्नादं विमुञ्चन्वै निष्क्रान्तो वरुणालयात् ॥ ४५ ॥

आगतस्तु पथा येन तेनैव विनिवृत्य सः ।
लङ्कामभिमुखो रक्षो नभस्तलगतो ययौ ॥ ४६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com